श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# श्रीमद्वाल्मीकीयरामायणम्

## ॥ सुन्दरकाण्डम् ॥

### पञ्चदशः सर्गः

*This document** has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीसीतारामाभ्यां नमः

श्रीमते रामानुजाय नमः

# ॥ सुन्दरकाण्डम् ॥

## पञ्चदशः सर्गः

*वनसुषमामवलोकयता हनुमता चैत्यप्रासादसन्निधौ दयनीयां सीतामालोक्येयमेव सेति तर्कणं तस्य प्रसन्नता च*

स वीक्षमाणस्तत्रस्थो मार्गमाणश्च मैथिलीम्।
अवेक्षमाणश्च महीं सर्वां तामन्ववैक्षत॥ ५.१५.१ ॥

सन्तानकलताभिश्च पादपैरुपशोभिताम्।
दिव्यगन्धरसोपेतां सर्वतः समलङ्कृताम्॥ ५.१५.२ ॥

तां स नन्दनसङ्काशां मृगपक्षिभिरावृताम्।
हर्म्यप्रासादसम्बाधां कोकिलाकुलनिः स्वनाम्॥ ५.१५.३ ॥

काञ्चनोत्पलपद्माभिर्वापीभिरुपशोभिताम्।
बह्वासनकुथोपेतां बहुभूमिगृहायुताम्॥ ५.१५.४ ॥

सर्वर्तुकुसुमै रम्यैः फलवद्भिश्च पादपैः।
पुष्पितानामशोकानां श्रिया सूर्योदयप्रभाम्॥ ५.१५.५ ॥

प्रदीप्तामिव तत्रस्थो मारुतिः समुदैक्षत।
निष्पत्रशाखां विहगैः क्रियमाणामिवासकृत्॥ ५.१५.६ ॥

विनिष्पतद्भिः शतशश्चित्रैः पुष्पावतंसकैः।
समूलपुष्परचितैरशोकैः शोकनाशनैः॥ ५.१५.७ ॥

पुष्पभारातिभारैश्च स्पृशद्भिरिव मेदिनीम्।
कर्णिकारैः कुसुमितैः किंशुकैश्च सुपुष्पितैः॥ ५.१५.८ ॥

www.prapatti.com

स देशः प्रभया तेषां प्रदीप्त इव सर्वतः।
पुन्नागाः सप्तपर्णाश्च चम्पकोद्दालकास्तथा॥ ५.१५.९ ॥

विवृद्धमूला बहवः शोभन्ते स्म सुपुष्पिताः।
शातकुम्भनिभाः केचित् केचिदग्निशिखप्रभाः॥ ५.१५.१० ॥

नीलाञ्जननिभाः केचित् तत्राशोकाः सहस्रशः।
नन्दनं विबुधोद्यानं चित्रं चैत्ररथं यथा॥ ५.१५.११ ॥

अतिवृत्तमिवाचिन्त्यं दिव्यं रम्यश्रियायुतम्।
द्वितीयमिव चाकाशं पुष्पज्योतिर्गणायुतम्॥ ५.१५.१२ ॥

पुष्परत्नशतैश्चित्रं पञ्चमं सागरं यथा।
सर्वर्तुपुष्पैर्निचितं पादपैर्मधुगन्धिभिः॥ ५.१५.१३ ॥

नानानिनादैरुद्यानं रम्यं मृगगणद्विजैः।
अनेकगन्धप्रवहं पुण्यगन्धं मनोहरम्॥ ५.१५.१४ ॥

शैलेन्द्रमिव गन्धाढ्यं द्वितीयं गन्धमादनम्।
अशोकवनिकायां तु तस्यां वानरपुङ्गवः॥ ५.१५.१५ ॥

स ददर्शाविदूरस्थं चैत्यप्रासादमूर्जितम्।
मध्ये स्तम्भसहस्रेण स्थितं कैलासपाण्डुरम्॥ ५.१५.१६ ॥

प्रवालकृतसोपानं तप्तकाञ्चनवेदिकम्।
मुष्णन्तमिव चक्षूंषि द्योतमानमिव श्रिया॥ ५.१५.१७ ॥

निर्मलं प्रांशुभावत्वादुल्लिखन्तमिवाम्बरम्।
ततो मलिनसंवीतां राक्षसीभिः समावृताम्॥ ५.१५.१८ ॥

उपवासकृशां दीनां निःश्वसन्तीं पुनः पुनः।
ददर्श शुक्लपक्षादौ चन्द्ररेखामिवामलाम्॥ ५.१५.१९ ॥

मन्दप्रख्यायमानेन रूपेण रुचिरप्रभाम्।
पिनद्धां धूमजालेन शिखामिव विभावसोः॥ ५.१५.२० ॥



www.prapatti.com

पीतेनैकेन संवीतां क्लिष्टेनोत्तमवाससा।
सपङ्कामनलङ्कारां विपद्मामिव पद्मिनीम्॥ ५.१५.२१ ॥

पीडितां दुःखसन्तप्तां परिक्षीणां तपस्विनीम्।
ग्रहेणाङ्गारकेणेव पीडितामिव रोहिणीम्॥ ५.१५.२२ ॥

अश्रुपूर्णमुखीं दीनां कृशामनशनेन च।
शोकध्यानपरां दीनां नित्यं दुःखपरायणाम्॥ ५.१५.२३ ॥

प्रियं जनमपश्यन्तीं पश्यन्तीं राक्षसीगणम्।
स्वगणेन मृगीं हीनां श्वगणेनावृतामिव॥ ५.१५.२४ ॥

नीलनागाभया वेण्या जघनं गतयैकया।
नीलया नीरदापाये वनराज्या महीमिव॥ ५.१५.२५ ॥

सुखार्हां दुःखसन्तप्तां व्यसनानामकोविदाम्।
तां विलोक्य विशालाक्षीमधिकं मलिनां कृशाम्॥ ५.१५.२६ ॥

तर्कयामास सीतेति कारणैरुपपादिभिः।
ह्रियमाणा तदा तेन रक्षसा कामरूपिणा॥ ५.१५.२७ ॥

यथारूपा हि दृष्टा सा तथारूपेयमङ्गना।
पूर्णचन्द्राननां सुभ्रूं चारुवृत्तपयोधराम्॥ ५.१५.२८ ॥

कुर्वतीं प्रभया देवीं सर्वा वितिमिरा दिशः।
तां नीलकण्ठीं बिम्बोष्ठीं सुमध्यां सुप्रतिष्ठिताम्॥ ५.१५.२९ ॥

सीतां पद्मपलाशाक्षीं मन्मथस्य रतिं यथा।
इष्टां सर्वस्य जगतः पूर्णचन्द्रप्रभामिव॥ ५.१५.३० ॥

भूमौ सुतनुमासीनां नियतामिव तापसीम्।
निःश्वासबहुलां भीरुं भुजगेन्द्रवधूमिव॥ ५.१५.३१ ॥

शोकजालेन महता विततेन न राजतीम्।
संसक्तां धूमजालेन शिखामिव विभावसोः॥ ५.१५.३२ ॥

तां स्मृतीमिव सन्दिग्धामृद्धिं निपतितामिव।
विहतामिव च श्रद्धामाशां प्रतिहतामिव॥ ५.१५.३३ ॥

सोपसर्गां यथा सिद्धिं बुद्धिं सकलुषामिव।
अभूतेनापवादेन कीर्तिं निपतितामिव॥ ५.१५.३४ ॥

रामोपरोधव्यथितां रक्षोगणनिपीडिताम्।
अबलां मृगशावाक्षीं वीक्षमाणां ततस्ततः॥ ५.१५.३५ ॥

बाष्पाम्बुपरिपूर्णेन कृष्णवक्राक्षिपक्ष्मणा।
वदनेनाप्रसन्नेन निःश्वसन्तीं पुनः पुनः॥ ५.१५.३६ ॥

मलपङ्कधरां दीनां मण्डनार्हाममण्डिताम्।
प्रभां नक्षत्रराजस्य कालमेघैरिवावृताम्॥ ५.१५.३७ ॥

तस्य सन्दिदिहे बुद्धिस्तथा सीतां निरीक्ष्य च।
आम्नायानामयोगेन विद्यां प्रशिथिलामिव॥ ५.१५.३८ ॥

दुःखेन बुबुधे सीतां हनुमाननलङ्कृताम्।
संस्कारेण यथा हीनां वाचमर्थान्तरं गताम्॥ ५.१५.३९ ॥

तां समीक्ष्य विशालाक्षीं राजपुत्रीमनिन्दिताम्।
तर्कयामास सीतेति कारणैरुपपादयन्॥ ५.१५.४० ॥

वैदेह्या यानि चाङ्गेषु तदा रामोऽन्वकीर्तयत्।
तान्याभरणजालानि गात्रशोभीन्यलक्षयत्॥ ५.१५.४१ ॥

सुकृतौ कर्णवेष्टौ च श्वदंष्ट्रौ च सुसंस्थितौ।
मणिविद्रुमचित्राणि हस्तेष्वाभरणानि च॥ ५.१५.४२ ॥

श्यामानि चिरयुक्तत्वात् तथा संस्थानवन्ति च।
तान्येवैतानि मन्येऽहं यानि रामोऽन्वकीर्तयत्॥ ५.१५.४३ ॥

तत्र यान्यवहीनानि तान्यहं नोपलक्षये।
यान्यस्या नावहीनानि तानीमानि न संशयः॥ ५.१५.४४ ॥



www.prapatti.com

पीतं कनकपट्टाभं स्रस्तं तद्वसनं शुभम्।
उत्तरीयं नगासक्तं तदा दृष्टं प्लवङ्गमैः॥ ५.१५.४५ ॥

भूषणानि च मुख्यानि दृष्टानि धरणीतले।
अनयैवापविद्धानि स्वनवन्ति महान्ति च॥ ५.१५.४६ ॥

इदं चिरगृहीतत्वाद् वसनं क्लिष्टवत्तरम्।
तथाप्यनूनं तद्वर्णं तथा श्रीमद्यथेतरत्॥ ५.१५.४७ ॥

इयं कनकवर्णाङ्गी रामस्य महिषी प्रिया।
प्रणष्टापि सती यस्य मनसो न प्रणश्यति॥ ५.१५.४८ ॥

इयं सा यत्कृते रामश्चतुर्भिरिह तप्यते।
कारुण्येनानृशंस्येन शोकेन मदनेन च॥ ५.१५.४९ ॥

स्त्री प्रणष्टेति कारुण्यादाश्रितेत्यानृशंस्यतः।
पत्नी नष्टेति शोकेन प्रियेति मदनेन च॥ ५.१५.५० ॥

अस्या देव्या यथारूपमङ्गप्रत्यङ्गसौष्ठवम्।
रामस्य च यथारूपं तस्येयमसितेक्षणा॥ ५.१५.५१ ॥

अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम्।
तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति॥ ५.१५.५२ ॥

दुष्करं कृतवान् रामो हीनो यदनया प्रभुः।
धारयत्यात्मनो देहं न शोकेनावसीदति॥ ५.१५.५३ ॥

एवं सीतां तथा दृष्ट्वा हृष्टः पवनसम्भवः।
जगाम मनसा रामं प्रशशंस च तं प्रभुम्॥ ५.१५.५४ ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे पञ्चदशः सर्गः॥